श्री त्रिपुरभैरवी स्तोत्रं

श्री त्रिपुरभैरवी स्तोत्रं

श्री भैरव उवाच-
ब्रह्मादयस्स्तुति शतैरपि सूक्ष्मरूपं
जानंतिनैव जगदादिमनादिमूर्तिं |
तस्मादमूं कुचनतां नवकुंकुमास्यां
स्थूलां स्तुवे सकलवाङ्मयमातृभूतां || 1 ||

सद्यस्समुद्यत सहस्र दिवाकराभां
विद्याक्षसूत्रवरदाभयचिह्नहस्तां |
नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां
त्वां तारहाररुचिरां त्रिपुरां भजामः || 2 ||

सिंदूरपूररुचिरां कुचभारनम्रां
जन्मांतरेषु कृतपुण्य फलैकगम्यां |
अन्योन्य भेदकलहाकुलमानभेदै-
-र्जानंतिकिंजडधिय स्तवरूपमन्ये || 3 ||

स्थूलां वदंति मुनयः श्रुतयो गृणंति
सूक्ष्मां वदंति वचसामधिवासमन्ये |
त्वांमूलमाहुरपरे जगतांभवानि
मन्यामहे वयमपारकृपांबुराशिं || 4 ||

चंद्रावतंस कलितां शरदिंदुशुभ्रां
पंचाशदक्षरमयीं हृदिभावयंती |
त्वां पुस्तकंजपपटीममृताढ्य कुंभां
व्याख्यांच हस्तकमलैर्दधतीं त्रिनेत्रां || 5 ||

शंभुस्त्वमद्रितनया कलितार्धभागो
विष्णुस्त्वमंब कमलापरिणद्धदेहः |
पद्मोद्भवस्त्वमसि वागधिवासभूमि-
रेषां क्रियाश्च जगति त्रिपुरेत्वमेव || 6 ||

आश्रित्यवाग्भव भवांश्चतुरः परादीन्-
भावान्पदात्तु विहितान्समुदारयंतीं |
कालादिभिश्च करणैः परदेवतां त्वां
संविन्मयींहृदिकदापि नविस्मरामि || 7 ||

आकुंच्य वायुमभिजित्यच वैरिषट्कं
आलोक्यनिश्चलधिया निजनासिकाग्रां |
ध्यायंति मूर्ध्नि कलितेंदुकलावतंसं
त्वद्रूपमंब कृतिनस्तरुणार्कमित्रं || 8 ||

त्वं प्राप्यमन्मथरिपोर्वपुरर्धभागं
सृष्टिंकरोषि जगतामिति वेदवादः |
सत्यंतदद्रितनये जगदेकमातः
नोचेद शेषजगतः स्थितिरेवनस्यात् || 9 ||

पूजांविधायकुसुमैः सुरपादपानां
पीठेतवांब कनकाचल कंदरेषु |
गायंतिसिद्धवनितास्सहकिन्नरीभि-
रास्वादितामृतरसारुणपद्मनेत्राः || 10 ||

विद्युद्विलास वपुषः श्रियमावहंतीं
यांतीमुमांस्वभवनाच्छिवराजधानीं |
सौंदर्यमार्गकमलानिचका सयंतीं
देवींभजेत परमामृत सिक्तगात्रां || 11 ||

आनंदजन्मभवनं भवनं श्रुतीनां
चैतन्यमात्र तनुमंबतवाश्रयामि |
ब्रह्मेशविष्णुभिरुपासितपादपद्मं
सौभाग्यजन्मवसतिं त्रिपुरेयथावत् || 12 ||

सर्वार्थभाविभुवनं सृजतींदुरूपा
यातद्बिभर्ति पुनरर्क तनुस्स्वशक्त्या |
ब्रह्मात्मिकाहरतितं सकलंयुगांते
तां शारदां मनसि जातु न विस्मरामि || 13 ||

नारायणीति नरकार्णवतारिणीति
गौरीति खेदशमनीति सरस्वतीति |
ज्ञानप्रदेति नयनत्रयभूषितेति
त्वामद्विराजतनये विबुधा पदंति || 14 ||

येस्तुवंतिजगन्मातः श्लोकैर्द्वादशभिःक्रमात् |
त्वामनु पाप्य्वाक्सिद्धिं प्राप्नुयुस्ते परांश्रियं || 15 ||

इतिते कथितं देवि पंचांगं भैरवीमयं |
गुह्याद्गोप्यतमंगोप्यं गोपनीयं स्वयोनिवत् || 16 ||

इति श्रीरुद्रयामळे उमामहेश्वर संवादे पंचांगखंड निरूपणे श्रीभैरवीस्तोत्रं |